दृष्ट्वानिलसुतं देवा गच्छन्तं वायुवेगतः ।
परीक्षणार्थं सत्त्वस्य वानरस्येदमब्रुवन् ॥
गच्छत्येष महासत्त्वो वानरो वायुविक्रमः ।
लङ्कां प्रवेष्टुं शक्तो वा न वा जानीमहे बलम् ॥
एवं विचार्य्य नागानां मातरं सुरसाभिधाम् ।
अब्रवीद्देवतावृन्दः कौतूहलसमन्वितः ॥
गच्छ त्वं वानरेन्द्रस्य किञ्चिद्विघ्नं समाचर ।
ज्ञात्वा तस्य बलं बुद्धिं पुनरेहि त्वरान्विता ॥
इत्युक्ता सा ययौ शीघ्रं हनुमद्विघ्नकारणात् ।
आवृत्य मार्गं पुरतः स्थित्वा वानरमब्रवीत् ॥
एहि मे वदनं शीघ्रं प्रविशस्व महामते ! ।
देवैस्त्वं कल्पितो भक्ष्यः क्षुधासम्पीडितात्मनः ॥
तामाह हनुमान् मातरहं रामस्य शासनात् ।
गच्छामि जानकीं द्रष्टुं पुनरागम्य सत्वरः ॥
रामाय कुशलं तस्याः कथयित्वा त्वदाननम् ।
निवेक्ष्ये देहि मे मार्गं सुरसायै नमोऽस्तु ते ॥
इत्युक्ता पुनरेवाह सुरसा क्षुधितास्म्यहम् ।
प्रविश्य गच्छ मे वक्त्रं नोचेत् त्वां भक्षयाम्यहम् ॥
इत्युक्तो हनुमानाह मुखं शीघ्रं विदारय ।
प्रविश्य वदनं तेऽद्य गच्छामि त्वरयान्वितः ॥
इत्युक्ता योजनायामदेहो भूत्वा पुरः स्थितः ।
दृष्ट्वा हनुमतो रूपं सुरसा पञ्चयोजनम् ।
मुखं चकार हनुमान् द्विगुणं रूपमादधत् ॥
ततश्चकार सुरसा योजनानाञ्च विंशतिम् ।
वक्त्रं चकार हनुमांस्त्रिंशद्योजनसम्मितम् ॥
ततश्चकार सुरसा पञ्चाशद्योजनायतम् ।
वक्त्रं तदा हनूमांस्तु बभूवाङ्गुष्ठसन्निभः ॥
प्रविश्य वदनं तस्याः पुनरेत्य पुरः स्थितः ।
प्रविष्टो निर्गतोऽहं ते वदनं देवि ! ते नमः ॥
एवं वदन्तं दृष्ट्वा सा हनुमन्तमथाब्रवीत् ।
गच्छ साधय रामस्य कार्य्यं बुद्धिमतां वर ! ॥
देवैः सम्प्रेषिताहं ते बलं जिज्ञासुभिः कपे ! ।
दृष्ट्वा सीतां पुनर्गत्वा रामं द्रक्ष्यसि गच्छ भो ॥"
कद्रूः । इति महाभारतम् ॥)

नागमारः, पुं, (नागं मारयतीति । मृ + णिच् + अण् ।) केशराजः । इति त्रिकाण्डशेषः ॥ हस्तिमारके सर्पमारके च त्रि ॥

नागयष्टिः, स्त्री, (नागाधिष्ठिता यष्टिः ।) पुष्करिण्यादिस्थितकाष्ठविशेषः । रइकाठ इति भाषा ॥ तत्पर्य्यायः । नागाञ्चला २ । इति जटाधरः ॥ (यथा, हयशीर्षे ।
"वैणव नारुणञ्चैव पुन्नागं नागकेशरम् ।
वकुलं चम्पकञ्चैव विल्वञ्चैवाथ खादिरम् ॥
एतेषामेव दारूणां नागयष्टिः प्रकीर्त्तिता ।
सवक्रकोटरं त्यक्त्वा तस्मात् कुर्य्यात् यथेप्सितम् ॥")

नागरं, क्ली, (नगरे भवम् । नगर + अण् ।) शुण्ठी । इत्यमरः । २ । ९ । ३८ ॥ (अस्य गुणा यथा,—
"नागरं दीपनं वृष्यं ग्राहि हृद्यं विबन्धनुत् ।
रुच्यं लघु स्वादुपाकं स्निग्धोष्णं कफवातजित् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
यथा च गारुड़े । १८६ अध्याये ।
"शुण्ठीतकचपायुक्तं मरीचं नागरं तथा ।
चर्व्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत् ॥")
मुस्ता । इति मेदिनी । रे, १७२ ॥ रतबन्धः । इति विश्वः ॥ (क्वचित् पुं ।) नागरदेशीयाचरञ्च ॥

नागरः, पुं, (नागरो विदग्धस्तद्भावोऽस्त्यस्येति । अच् ।) देवरः । इति त्रिकाण्डशेषः ॥ नागरङ्गः । इति शब्दरत्नावली ॥ त्रि, (नगरे भवः । "तत्र भवः ।" ४।३।५३ । इत्यण् ।) विदग्धः । (यथा, आर्य्यासप्तशत्याम् । ३२३ ।
"नागर गीतिरिवासौ ग्रामस्थिताापि भूषिता सुतनुः ।
कस्तूरी न म्लगोदरवासवशाद्विस्रतामेति ॥")
नगरोद्भवः । इति मेदिनी । रे, १७२ ॥ (यथा, देवीभागवते । २ । ६ । ६६ ।
"नागरा धृतराष्ट्रस्य सर्व्वे तत्र समाययुः ॥"
नगरहितश्च । यथा, महाभारते । २।५।१२२ ।
"धनुर्व्वेदस्य सूत्रं वै यन्त्रसूत्रञ्च नागरम् ॥")

नागरकः, पुं, (नागर एव । स्वार्थे कन् । यद्वा, नागरेण कायतीति । कै + कः ।) रतिबन्धविशेषः । यथा,—
"ऊरुमूलोपरि स्थित्वा योषिदूरुद्वयं यदि ।
ग्रीवां धृत्वा कराभ्याञ्च बन्धो नागरको मतः ॥"
इति रतिमञ्जरी ॥

नागरक्तं, क्ली, (नागजातं रक्तम् ।) सिन्दूरम् । इति हेमचन्द्रः ।४।१२७॥ नागस्य शोणितञ्च ॥

नागरघनः, पुं, (नागर एव घनो मुस्ता ।) नागरमुस्ता । इति राजनिर्घण्टः ॥ (नागरमुस्ताशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

नागरङ्गः, पुं, (नागस्य नागसम्भूतस्य सिन्दूरस्येव रङ्गो यस्य ।) वृक्षविशेषः । नारङ्गीलेबुर गाछ इति भाषा ॥ इत्यमरः । २ । ४ । ३८ ॥ तत्पर्य्यायः । नारङ्गः २ नार्य्यङ्गः ३ नागरः ४ ऐरावतः ५ नागरुकः ६ वक्राधिवासी ७ । इति शब्दरत्नावली ॥ तत्फलगुणाः । सुरभित्वम् । विपाके गुरुत्वम् । दुर्ज्जरत्वम् । अत्यम्लत्वम् । ईषन्मधुरत्वम् । हृष्यत्वम् । वातविनाशित्वञ्च । तत्केशरगुणः । रुच्यत्वम् । वातहरत्वञ्च । इति राजवल्लभः ॥

नागरमुस्ता, स्त्री, (नागर इव मुस्ता ।) मुस्ताप्रभेदः । नागरमुता इति भाषा ॥ तत्पर्य्यायः । नागरोत्था २ नागरादिघनसंज्ञका ३ चक्राङ्का ४ नादेयी ५ चूड़ाला ६ पिण्डमुस्ता ७ शिशिरा ८ वृषध्वाङ्क्षी ९ कच्छरुहा १० चारुकेसरा ११ उच्चटा १२ पूर्णकोष्ठसंज्ञा १३ कलापिनी १४ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । कषायत्वम् । शीतलत्वम् । कफपित्तज्वरातिसारारुचितृष्णादाहभ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥

नागराजः, पुं, (नागानां राजा । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) शेषः । अनन्तः । यथा, कविकल्पद्रुमे ।
"पाताले नागराजं भुजगयुवतयो यस्य गायन्ति कीर्त्तिम् ॥"

नागराह्वं, क्ली, (नागरमिति आह्वा आख्या यस्य ।) शुण्ठी । इति राजनिर्घण्टः ॥ (विवृतिरस्या शुण्ठीशब्दे ज्ञातव्या ॥)

नागरी, स्त्री, (नगरे भवा । नगर + अण् + ङीप् ।) स्नुही । इति शब्दचन्द्रिका ॥ विदग्धा नारी । यथा, उद्भटः ।
"हन्ताभीरीः स्मरतु स कथं संवृतो नागरीभिः ॥"
नागरपत्नी । नगरभवे, त्रि ॥

नागरुकः, पुं, (नागं रवते साहश्येन प्राप्नोतीति । रु गतौ + बाहुलकात् कप्रत्ययेन साधुः ।) नागरङ्गः । इति शब्दरत्नावली ॥

नागरेणुः, पुं, (नागस्य सीसकस्य रेणुः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥

नागरेयकः, त्रि, (नगरे भवः नगरस्यायं वा । "कत्र्यादिभ्यो ढकञ् ।" ४ । २ । ९५ । इति ढकञ् ।) नगरसम्बन्धी । नगरस्यायमिति अणीयप्रत्ययान्तात् स्वार्थे कः ॥

नागलता, स्त्री, (नागः सर्पस्तद्वत् लता ।) लिङ्गम् । इति त्रिकाण्डशेषः ॥

नागलोकः, पुं, (नागानां लोकः ।) पातालम् । इत्यमरः ।१।८।१॥ (यथा, हरिवंशे । ८२ । ८४ ।
"रसातले स ददृशे नागलोकमिमं यथा ॥")

नागवल्लरी, स्त्री, (नाग इव दीर्घा वल्लरी ।) नागवल्ली । इति भावप्रकाशः ॥

नागवल्लिका, स्त्री, (नागवल्लि + स्वार्थे कन् ।) नागवल्ली । इति रत्नमाला ॥

नागवल्ली, स्त्री, (नाग इव दीर्घा वल्ली लता ।) ताम्बूली । इत्यमरः । २ । ४ । १२० ॥ अस्याः पर्य्यायास्ताम्बूलवल्लीशब्दे गुणाश्च ताम्बूलशब्दे द्रष्टव्याः । सा च श्रीवाटाम्लवाटादिनानाग्रामस्थस्थानभेदादेव भिन्ना ।
"एकाप्येषा देशभेदात्सुविशेषा-
न्नानाकारं याति काये गुणे च ॥
श्रीवाटी मधुरा तीक्ष्णा वातपित्तकफापहा ।
रसाढ्या च रसा रुच्या विपाके शिशिरा सुला ॥
स्यादम्लवाटी कटुकाम्लतिक्ता
तीक्ष्णा-तथोष्णा मुखपाककर्त्री ।
विदाहपित्तास्रविकोपनी च
विष्टम्भदा वातनिवर्हणी च ॥
सप्तमी मधुरा तीक्ष्णा कटुरुच्या च पाचनी ।
गुल्मोदराध्मानहरा रुचिकृद्दीपनी परा ॥"
अन्यच्च ।
"गुहागरे सप्तशिरा प्रसिद्धा
तत्पर्णपूर्णातिरसातिरुच्या ।
सुगन्धितीक्ष्णा मधुरातिहृद्या
सन्दीपनी पुंस्त्वकरा च बल्या ॥
विरेचनी वक्त्रसुगन्धिकारिणी ।
नाम्ना याम्लसरा सुतीक्ष्णमधुरा रुच्या हिमा दाहनुत्
पित्तोद्रेकहरा सुदीपनकरी बल्या सुखामोदिनी ।